Topics :16

## सप्तमी विभक्ति - 2

पात्रेसमितादयश्च । एते निपात्यन्तेऽक्षेपे ।

पात्रेसमिताः भोजनसमय एव सङ्गताः, न तु कार्ये । गेहेशूरः । गेहे नर्दी । आकृतिगणोऽयम् । चकारोऽवधारणार्थः । तेनैषां समासान्तरे घटकतया प्रवेशो न । परमाः पात्रेसमिताः

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । विशेषणं विशेष्येण - इति सिद्धे पूर्वनिपातनियमार्थं सूत्रम् । एक शब्दस्य । दिक्संख्ये संज्ञायाम् । इति नियमबाधनार्थं च । पूर्व स्नाताः पश्चादनुलिप्तः । ~~एकनाथ~~ स्नातानुलिप्तः । एकनाथः । सर्वयाज्ञिकाः । जरन्नैयायिकाः । पुराणमीमांसकाः । नवपाठकाः । केवलवैयाकरणाः

दिक्संख्ये संज्ञायाम् । समानाधिकरणेन । इत्यापादपरिसमाप्तेरधिकारः । संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वेषु कामशमी सप्तर्षयः । नेह, उत्तरा वृक्षाः । पञ्च ब्राह्मणाः

संज्ञा के विषय में दिशावाचक और संख्यावाचक सुबन्त को समानाधिकरण वाले सुबन्त (जिसका आधार समान ही हो) के साथ समास होता है और

इस समास को तत्पुरुष कहते हैं। उदाहरण के लिए 'पूर्वा च इषुकामशमी च' - इस विग्रह में दिशावाचक सुबन्त 'पूर्वा' का समानाधिकरण वाले सुबन्त 'इषुकामशमी' के साथ प्रकृत सूत्र से समास होकर 'पूर्वेषुकामशमी' रूप बनता है। यह प्राचीन ग्राम-विशेष की संज्ञा है। इसी प्रकार 'सप्त च ते ऋषयः' — इस विग्रह में भी संख्यावाचक सुबन्त 'सप्त' का समानाधिकरण वाले सुबन्त 'ऋषयः' के साथ समास हो 'सप्तर्षयः' रूप सिद्ध होता है। संज्ञा में ही दिशावाचक और संख्यावाचक पदों का समास होता है, अन्यथा नहीं। उदाहरण के लिए 'उत्तरा वृक्षाः' में दिशावाचक 'उत्तरा' के सुबन्त होने पर भी संज्ञा न होने से समास नहीं होता।